शुकनाशनः, पुं, (शुकं नाशयतीति । नश + णिच् + ल्युः । ) दद्रुघ्नः । इति राजनिर्घण्टः ॥ शुकनाशके, त्रि ॥

शुकनासः, पुं, (शुकस्य नासेव फलं यस्य ।) श्योणाकवृक्षः । इत्यमरः ॥ शुकवन्नासायुक्ते, त्रि ॥

शुकपिच्छिः, स्त्री, शूकशिम्बी । इति शब्दरत्नावली ॥

शुकपुच्छः, पुं, (शुकस्य पुच्छ इव ।) गन्धकः । इति हेमचन्द्रः ॥ शुकस्य लाङ्गुलञ्च ॥

शुकपुच्छकं, क्ली, (शुकस्य पुच्छ इव । कन् ।) स्थौणेयम् । इति राजनिर्घण्टः ॥ शुकवत्पुच्छयुक्ते, त्रि ॥

शुकपुष्पं, क्ली, (शुकप्रियं पुष्पमस्य ।) स्थौणेयम् इति भावप्रकाशः ॥

शुकपुष्पः, पुं, (शुकप्रियं पुष्पमस्य ।) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

शुकप्रियः, पुं, (शुकस्य प्रियः ।) शिरीषवृक्षः । इति भावप्रकाशः ॥ शुकवल्लभे, त्रि ॥

शुकप्रिया, स्त्री, (शुकस्य प्रिया ।) जम्बूः । इति राजनिर्घण्टः ॥

शुकफलः, पुं (शुक इव फलमस्य । तद्वर्णफलवत्त्वात् तथात्वम् ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

शुकवर्हं, क्ली, (शुकस्य वर्हमिव ।) गन्धद्रव्यविशेषः । इति शब्दरत्नावली ॥ गँठियाला इति भाषा ॥

शुकम्, व्य, शीघ्रम् । इति केचित् ॥

शुकवल्लभः, पुं (शुकस्य वल्लभः प्रियः ।) दाड़िमः । इति राजनिर्घण्टः । शुकप्रिये, त्रि ॥

शुकवाहः, पुं, (शुको वाहो वाहनं यस्य ।) कामदेवः । इति केचित् ॥ शुकपक्षिवाहके, त्रि ॥

शुकशिम्बा, स्त्री, कपिकच्छुः । इति शब्दरत्नावली ॥

शुकशिम्बिः, स्त्री, कपिकच्छुः । इति शब्दरत्नावली ॥

शुकाख्या, स्त्री, (शुकस्य आख्या आख्या यस्याः ।) वृक्षविशेषः । शयाठोँटी इति भाषा । तत्पर्य्यायः । शुकनासा २ शुकजिह्वा ३ शुकानना ४ । इति रत्नमाला ॥

शुकादनः, पुं, (शुकेन अद्यतेऽसौ इति । अद + कर्म्मणि ल्युट् ।) दाड़िमः । इति शब्दचन्द्रिका ॥ शुकस्यादनीयद्रव्यमात्रे, त्रि ॥

शुकानना, स्त्री, (शुकस्याननमिव फलं यस्याः । शुकाख्यावृक्षः । इति रत्नमाला ॥ शुकतुल्यमुखे, त्रि ॥

शुकी, स्त्री, (शुक + ङीष् ।) कश्यपपत्नी । यथा,

"शुकी श्येनी च भासी च सुग्रीवा शुचिगृध्रिका ।"

अत्र शुचिभाषिका इत्यपि पाठः ।

"शुकी शुकानजनयदुलूकी प्रत्युलूककान् ।"

इति गारुड़े ६ अध्यायः ॥

शुकपक्षिणी च ॥

शुकोदरं, क्ली, (शुकस्योदरमिव ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥ कीरजठरञ्च ॥

शुक्तं, क्ली, (शुच क्लेदे + क्तः ।) मांसम् । इति शब्दचन्द्रिका ॥ काञ्जिकम् । इति हारावली ॥ द्रवद्रव्यविशेषः । यथा,—

"कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्तद्रव्येऽभिसूयन्ते तच्छुक्तमभिधीयते ॥"

अस्य गुणाः ।

"शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु ।
रूक्षं कम्युदरानाहशोषार्शोविषकुष्ठनुत् ॥"

इति राजनिर्घण्टः ॥ * ॥

शुक्तं यन्मधुरं कालवशादम्लतां गतम् । इति प्रायश्चित्तविवेकः ॥ तस्य भक्षणनिषेधो यथा । यमः ।

"अपूपाश्च करम्भाश्च धाना वटकशक्तवः ।
शाकं मांसमपूपञ्च सूपं कृशरमेव च ॥
यवागुं पायसञ्चैव यच्चान्यत् स्नेहसम्भवम् ।
सर्व्वं पर्य्युषितं भक्ष्यं शुक्तञ्च परिवर्ज्जयेत् ॥"

तत्प्रतिप्रसवो यथा । मनुः ।

"दधिभक्ष्यञ्च शुक्तेषु सर्व्वञ्च दधिसम्भवम् ॥"

इति तिथ्यादितत्त्वम् ॥

(यथा च मनुः । २ । १७७ ।

"वर्ज्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम् ॥"

"यानि स्वभावतो मधुरादिरसानि कालवशेन उदकवासादिना चाम्लवन्ति तानि शुक्तानि ।"

इति तट्टीकायां कुल्लूकभट्टः ॥)

शुक्तं, त्रि, (शुच + क्तः ।) निष्ठुरम् । इति मेदिनी ॥ पूतम् । अम्लम् । इति विश्वः ॥ श्लिष्टम् । निर्ज्जनम् । इति शब्दरत्नावली ॥

शुक्ता, स्त्री, (शुक्त + स्त्रियां टाप् ।) चुक्रिका । इति शब्दरत्नावली ॥

शुक्तिः, स्त्री, (शुच् + क्तिन् ।) जलजन्तुविशेषः । झिनुक् इति भाषा । तत्पर्य्यायः । मुक्तास्फोटः २ । इत्यमरः ॥ शुक्तिका ३ । इति जटाधरः ॥ मुक्तिप्रसूः ४ महाशुक्तिः ५ तौतिकः ६ मौक्तिकप्रसवा ७ मौक्तिकशुक्तिः ८ मुक्तामाता ९ । अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । श्वासहृद्रोगहारित्वम् । शूलप्रशमनत्वम् । रुच्यत्वम् । मधुरत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ कपालखण्डम् । शङ्खः । शङ्खनखः । नखी । अश्वावर्त्तः । अर्शोरोगः । इति मेदिनी ॥ चक्षूरोगविशेषः । इति हेमचन्द्रः ॥ तद्विवरणं यथा,—

"प्रस्तारिशुक्लक्षतजोऽधिमांस-
स्नाय्वर्म्मसंज्ञाः खलु पञ्च रोगाः ।
स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या
जालं शिराणां पिड़िकाश्च तासाम् ॥
रोगा वलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्लभागे ॥"

शुक्तिमाह ।

"श्यावाः स्युः पिशितनिभाश्च विन्दवोऽयं
शुक्लाभाः सितनिचिताः स शुक्तिसंज्ञः ।"

श्यावा इत्यादि वर्णत्रयविकल्पो बोद्धव्यः ॥*॥

अथास्याश्चिकित्सा ।

"सेक आश्चोतनं पिण्डीविड़ालस्तर्पणं तथा ।
पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रमुपाचरेत् ॥"

इति कल्पविधिः ॥

तत्र सेकविधिर्यथा,—

"सेकस्तु दिवसे कार्य्यो रात्रौ चात्यन्तिके गदे ।
सेकस्तु सूक्ष्मधाराभिः सर्व्वस्मिन्नयने हितः ॥
मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलम् ।
एरण्डदलमूलत्वक्शृतमाजं पयो हितम् ।
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनम् ॥
यष्टीगैरिकसिन्धूत्थदार्व्वीतार्क्षैः समांशकैः ।
जलपिष्टैर्व्वहिर्लेपः सर्व्वनेत्रामयापहः ॥"२॥

इति भावप्रकाशः ॥*॥

कर्षद्वयपरिमाणम् । इति शब्दमाला ॥ चतुस्तोलकपरिमाणम् । तत्पर्य्यायः । अष्टमिका २ । इति वैद्यकपरिभाषा ॥

शुक्तिका, स्त्री, (शुक्तिरिव । स्वार्थे कन् ।) मुक्तास्फोटः । इति जटाधरः ॥ चुक्रिका । इति शब्दरत्नावली ॥

शुक्तिजं, क्ली, (शुक्तेर्जायते यदिति । शुक्ति + जन् + डः ।) मुक्ता । इति हेमचन्द्रः ॥ (यथा, बृहत्संहितायाम् । १२ । ४ ।

"प्रचलत्तिमिशुक्तिजशङ्खचितः
सलिलेऽपहृतेऽपि पतिः सरिताम् ॥")

शुक्तिबीजं, क्ली, (शुक्तेर्बीजमिव ।) मुक्ता । इति त्रिकाण्डशेषः ॥

शुक्तिमान्, [त्] पुं, पर्व्वतविशेषः । यथा,—

"महेन्द्रो मलयः सह्यः शुक्तिमान् गन्धमादनः ।
विन्ध्यश्च पारिपात्रश्च सप्तैते च कुलाचलाः ॥"

इति त्रिकाण्डशेषः ॥

शुक्रं क्ली, (शुच क्लेदे + "ऋज्रेन्द्राग्रवज्रेति ।" उणा० २ । २८ । इति रन्प्रत्ययेन साधु ।) मज्जजातधातुः । तत्पर्य्यायः । पुंस्त्वम् २ रेतः ३ बीजम् ४ वीर्य्यम् ५ पौरुषम् ६ तेजः ७ इन्द्रियम् ८ अन्नविकारः ९ मज्जारसः १० रोहणम् ११ बलम् १२ । इति राजनिर्घण्टः ॥ तस्योत्पत्तिर्यथा,—

"रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ।
मेदसोऽस्थि ततो मज्जा मज्ज्ञात् शुक्रस्य सम्भवः ॥

तस्य स्वरूपं यथा,—

"शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम् ।
गर्भवीजं वपुःसारो जीवस्याश्रय उत्तमः ॥"

जीवस्याश्रय उत्तम इति । यत आह ।

"जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः ।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात् ॥" *॥

गर्भसंजननशुक्रस्य लक्षणं यथा,—

"स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च ।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत् ॥"

तस्य स्थानमाह ।